Downloaded From : http://cbseportal.com/

This Question Paper consists 42 questions and 8 printed pages.
अस्मिन् प्रश्नपत्रे 42 प्रश्नाः एवम् 8 मुद्रित पृष्ठाः सन्ति ।

Roll No. / अनुक्रमाङ्कः | | | | | | | | | | | | |

Code No. 58/S/A/S
कूट सं.
Set - A

# SANSKRIT
## संस्कृतम्
## (209)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ________________________

Signature of Invigilators 1. ________________________
(निरीक्षकहस्ताक्षरो) 2. ________________________

**सामान्य अनुदेशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति ।

3 वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत् ।

4 वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।

5 उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

6 स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **58/S/A/S-A** अवश्यं लेखनीया ।



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From :http://cbseportal.com/

# SANSKRIT
# संस्कृतम्
# (209)

**समयः 3 होरात्रयम्]** **[पूर्णाङ्काः : 100**

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः सन्ति ।

**(2)** प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

**खण्ड – क**

**1** यत्नेन किं संरक्षेत् ? **1**

(A) वित्तम् (B) वृत्तम्
(C) रूपम् (D) धर्मम्

**2** नरः ________ कार्यम् कुर्यात् । **1**

(A) अल्प प्रयासेन (B) सर्वारंभेण
(C) अल्पबलेन (D) अल्पधनेन

**3** आकाशात् रामः सीताम् किम् अदर्शयत् ? **1**

(A) कबन्धम् (B) जटायुम्
(C) ऋष्यमूकपर्वतम् (D) रावणम्

**4** सर्वं परित्यज्य कम् अनुपालयेत् ? **1**

(A) बलम् (B) शरीरम्
(C) धनम् (D) गृहम्

**5** 'गीताञ्जलिः' कस्य कृतिः अस्ति ? **1**

(A) शिववीरस्य (B) रवीन्द्रनाथस्य
(C) कालिदासस्य (D) महात्मागांधिनः

**6** निर्बुद्धिः अपि केन कुशाग्रबुद्धिः जायते ? **1**

(A) पराक्रमेण (B) अवबोधनेन
(C) अभ्यासेन (D) अनुकरणेन



Downloaded From :http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

7 जनाः ध्यानं __________ कुर्वन्ति । 1

(A) चक्षुषा (B) मनसा

(C) श्रोत्रेण (D) कपालेन

8 करुणाभावैः विभूषितः नरः जीवने किं भजते ? 1

(A) यशःमानं च (B) धनं वस्त्रं च

(C) बलं विद्यां च (D) ज्ञानं धनं च

9 'शिवराजविजय' ग्रन्थस्य रचयिता कः ? 1

(A) अम्बिकादत्तव्यासः (B) रवीन्द्रनाथ टैगोरः

(C) कालिदासः (D) वाल्मीकिः

10 अहो बहुमत्स्योऽयं ह्रदः 'इत्यत्र' ह्रदः इति पदे का विभक्तिः ? 1

(A) प्रथमा (B) पञ्चमी

(C) षष्ठी (D) द्वितीया

11 धर्मस्य किमपि लक्षणद्वयं लिखत । 1+1=2

12 (i) देवासुरयोर्मध्ये कुत्र युद्धम् अभवत् ? 1+1=2

(ii) शक्रः शाल्मली वृक्षे कानि अपश्यत् ?

13 (i) ऋष्यमूकपर्वतः कैः वृतः आसीत् ? 1+1=2

(ii) पम्पातीरे रामेण कीदृशी शबरी दृष्टा ?

14 अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत – 1×3=3

सख्यौ – हला शकुन्तले ! अवसितमण्डना असि । परिधत्स्व क्षौमयुगलम् । (शकुन्तला उत्थाय परिधत्ते ।

(ततः प्रविशति कश्यपः)

गौतमी – जाते ! एषआनन्द परिवाहिन्या दृष्ट्यावीक्षमाणः गुरुःउपस्थितः । आचारं तावत् प्रतिपद्यस्व ।

शकुन्तला – (सलज्जम्) तात ! वन्दे ।

कण्वः – वत्से ! भर्तुः बहुमता भव । सम्राजं सुतम् आप्नुहि ।

गौतमी – भगवन् । वरः खलु एषः, न आशीः ।

कण्वः – वत्से इतः अग्निं प्रदक्षिणी कुरुष्व । एते वह्नयः दुरितम् अपध्नन्तः त्वां पावयन्तु । प्रतिष्ठस्व इदानीम् ।

**प्रश्नाः –**

(i) का अवसितमण्डना अस्ति ?

(ii) शकुन्तला किं परिधत्ते ?

(iii) गौतमी कं प्रति आचारं पालयितुं शकुन्तलां कथयति ?



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

15 अधोलिखितयोरेकस्य चरित्रचित्रणं पंचवाक्येषु संस्कृतेन कुरुत – 1×5=5

चन्द्रकेतुः **अथवा** कण्वः

16 प्रश्नान् उत्तरत – 1+1=2

(i) ''जयन्तः कस्य वै सुतः'' ? इति प्रहेलिकायाः किमुत्तरम् ?

(ii) शीतं कं न बाधते ? प्रहेलिकायाः उत्तरं लिखत ।

17 (i) आतुरस्य किं मित्रम् ? 1+1=2

(ii) तृणात् बहुतरी का ?

18 ब्राह्मेमुहूर्ते उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः । 1+1=2

सर्वमेव परित्यज्य शरीरमनु पालयेत् ॥

(i) कस्मिन् मुहूर्ते उत्तिष्ठेत् ?

(ii) सर्वं परित्यज्य 'कम्' अनुपालयेत् ?

19 ''त्वया विहीनो यत्राहं विललाप सुदुःखितः'' 1+1=2

(i) अत्र कः विलापम् अकरोत् ?

(ii) सा कस्याः विरह दुःखितः आसीत् ?

20 अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – 1×3=3

ईशस्तिष्ठति वर्षातपयोस्ताभ्यांसार्धं मलिनवपुः ।

दूरे क्षिय तव शुद्धां शाटीमेहि सइवपांसुरभूमिम् ॥

(i) ईशः कीदृश वपुः अस्ति ?

(ii) सः काभ्यां सार्धं तिष्ठति ?

(iii) 'शाटीम्' इत्यस्य कः अर्थः ?

21 अधोलिखितश्लोकस्य अन्वये रिक्तस्थानपूर्तिं कुरुत – 1×3=3

आयुः सत्वबलारोग्यसुखप्रीति विवर्धनाः ।

रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ॥

अन्वयः –

आयुः सत्वबलारोग्यसुखप्रीति विवर्धनाः __(i)__ स्निग्धाः __(ii)__ हृद्याः __(iii)__ सात्विकप्रियाः ।

22 रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 1+1=2

(i) <u>दौवारिकः</u> नम्रीभूय प्रणमति ।

(ii) ते <u>श्वः</u> मत्स्यसंक्षयं करिष्यन्ति ।



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

23 कः कं प्रति कथयति ? 1+1=2

(i) ''सत्य मैक्ष्वाकः खल्वसि'' ।

(ii) तातमा अतिमात्रं मम कृते उत्कण्ठस्व ।

24 रिक्तस्थानपूर्तिं कुरुत – 1+1=2

(i) माता भूमिः ............ पृथिव्याः ।

(ii) ............ बहुतरी तृणात् ।

25 अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – 1×3=3

ततस्तीरे सबर्मत्याः नाम्ना सत्याग्रहाश्रमः ।
महात्मा स्थापयामास सदनं सानुयात्रिकः ॥

(i) अत्र महात्मा इति पदं कस्मै प्रयुक्तम् ?

(ii) स महात्मा किं स्थापयामास ?

(iii) आश्रमः कस्याः नद्याः तीरे वर्तते ?

26 अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – 1×3=3

माता गुरतरा भूमेः खात् पितोच्चतरस्तथा ।
मनः शीघ्रतरं वातात् चिन्ता बहुतरी तृणात् ॥

(i) भूमेः अपि गुरुतरा का ?

(ii) मनः कस्मात् शीघ्रतरं प्रचलति ?

(iii) 'खात्' इत्यस्य पदस्य कः अर्थः ?

27 कस्यचिदेकस्य पाठस्य सारांशं पंचवाक्येषु संस्कृतेन लिखत – 1×5=5

(i) करुणापराः हि साधवः

(ii) त्याज्यं न धैर्यम्

(iii) प्रेरणा



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

## खण्ड – ख

### अनुप्रयुक्त व्याकरणम्

**28** अधोलिखितानां वर्णानाम् उच्चारणस्थानानि लिखत – $\frac{1}{2}\times4=2$

ख, झ, ट, श

**29** रेखांकितपदेषु सन्धिच्छेदं कृत्वा संधिनाम लिखत – **1×3=3**

सर्वारंभेण तत्कुर्यात्, सिंहादेकं प्रकीर्तितम् ।

यद्यपि चंदनविटपो विधिना ।

**30** संधिं कुरुत – **1+1=2**

बहु मत्स्यः + अयं ह्रदः । तत् + नूनं प्रभातसमये ।

**31** रेखांकितपदेषु कः मूलशब्दः का च विभक्तिः ? **1×2=2**

(i) लोभः महान् व्याधिः ।

(ii) अथ त्वं मां कं मन्यसे ?

**32** रिक्तस्थानेषु अंकानां स्थाने संख्यावाचकपदानि लिखत – **1×3=3**

(i) ___(4)___ जनाः जलाय कूपं खनन्ति ।

(ii) तत्र ___(2)___ मित्रे गच्छतः ।

(iii) सः ___(1)___ नेत्रेण पश्यति ।

**33** रेखांकितपदयोः कः धातुः कश्च लकारः ? **1+1=2**

(i) बोपदेवः व्याकरणम् अरचयत् ।

(ii) सुरक्षितं दैवहतं विनश्यति ।

**34** रेखांकित शब्दयोः उपसर्ग–प्रत्ययौ चित्वा पृथक् कुरुतः – **1+1=2**

(i) तपः किं लक्षणं प्रोक्तम् ।

(ii) मातापित्रोः सेवा कर्त्तव्या ।



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

35 अधोलिखितयोः समस्तपदयोः विग्रहं लिखत – 1+1=2

उपग्रहयानम् । धनहीनः ।

36 अधोलिखित विग्रहाणां कृते समस्तपदं लिखत – 1+1=2

(i) सत्याग्रहाय आश्रमः ।

(ii) महान्तौ बाहू यस्य सः ।

37 कोष्ठांतर्गत प्रकृतिप्रत्ययं संयोज्य रिक्तस्थानं पूरयत – 1+1=2

(i) तत्र दौवारिकः _________ (आ + या + क्त)

(ii) प्रांगणे _________ नृत्यति (बाल + टाप्)

38 कोष्ठगतशब्दस्य उपयुक्तरूपेण रिक्तस्थानानि पूरयत – 1×3=3

(i) माता _________ प्रति वदति । (पुत्र)

(ii) _________ उभयतः वृक्षाः सन्ति । (विद्यालय)

(iii) त्वम् _________ सह क्रीडसि । (मित्र)

## खण्ड – ग

## रचनाकौशलम्

39 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त प्रश्नान् उत्तरत – 1×5=5

भारतीयवाङ्मये श्रीमद्भगवद्गीतायाः महती प्रतिष्ठा अस्ति । ईश्वरस्वरूपस्य गुणकर्मणां प्रतिभाप्रमादीनांच वर्णनं यथा अस्मिन् ग्रंथे प्राप्यते न तथा अन्यत्र । गीतायाः सारमपि एतदेवास्ति यत् सर्वं परित्यज्य भगवतः शरणम् आगते कल्याणं निश्चितम् । गीतायाः गणना उपनिषत्सु क्रियते । अत एव अस्य अपरं नाम 'गीतोपनिषद्' इति आदि अस्ति । गीतायाः प्राकट्यं मार्गशीर्षमासे शुक्लपक्षस्य एकादश्यां तिथौ मन्यते । अस्मिन् दिने एव गीताजयन्ती मन्यते । गीतायाम् अष्टादश अध्यायाः सप्तशतश्लोकाश्च विद्यन्ते । कथ्यते 'गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः' ।

**प्रश्नाः –**

(i) गीतायां कीदृशं वर्णनं प्राप्यते ?

(ii) गीतायाः अपरं नाम किम् ?

(iii) गीताजयंती कस्मिन् मासे भवति ?

(iv) गीतायां कति श्लोकाः सन्ति ?

(v) गीता विषये किम् कथ्यते ?

40 अधोलिखित विषयमधिकृत्य मञ्जूषापदसहायतया संस्कृते एकम् अनुच्छेदं लिखत – 1×5=5

शरीरस्य स्वस्थता स्वच्छताच

**मञ्जूषा**

| |
|---|
| स्वास्थ्यम्, अनिवार्यम् कार्यसंपादनाय, सुखपूर्ण जीवनाय, वातावरणस्य, शुद्धिः, स्वस्थं मनः, बुद्धिः आत्मा, जीवनं, आनंदपूर्णम्,कर्त्तव्यपालनाय अपेक्षितम्, स्वस्थे शरीरे |



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

41 भवान् विजयः, भवतां मित्रं दिनेशः चेन्नईनगरस्थः । तं प्रतिजन्म दिनस्य शुभकामना पत्रं मंजूषायां प्रदत्तैः शब्दैः रिक्तस्थानानिपूरयित्वा लिखतु । 1×5=5

स्थानम् लक्ष्मणपुरम्

तिथि :______

प्रिय मित्र दिनेश,

नमोनमः

तव ______ अस्मिन् मासे एव ______ । अहं तदर्थं ______ प्रेषयामि । तवजीवनं ______ समृद्धं तथा च ______ स्यादिति अहं कामये । आत्मनः शुभकामना प्रेषयामि । इति;

तव सुहृत्,

विजयः

**मञ्जूषा**

| भविष्यति, शुभकामनाः, जन्मदिनम्, सुखपूर्णम्, स्वास्थ्यकरम् |
|---|

42 अधोलिखितं चित्रं दृष्ट्वा मञ्जूषापदसहायतया पञ्च वाक्यानि संस्कृतेन लिखत – 1×5=5



**मञ्जूषा**

| स्वच्छता, आवश्यकता, महती, जीवनस्य, वातावरणस्य, स्वच्छतया, मनः स्वच्छं, विद्यालये, अभियानम्, स्वच्छतायाः, विद्यार्थिनः, शिक्षकाः, मिलित्वा, अकुर्वन्, शोभा, परितः आगता । |
|---|



Downloaded From : http://cbseportal.com/ Courtesy : NIOS